श्रीगणेशाय नमः ॥ भद्राशांतिप्रयोगः ॥ आदौ गोमुखप्रसवं कृत्वा ॥ देशकालौ संकीर्त्य अस्य
शिशोः भद्राजननसूचितसकलारिष्टनिरसनद्वारा श्री० र्थं सग्रहमखां गर्गोक्तां भद्राज
ननशांतिं करिष्ये ॥ तत्रादौ गणेशपूजनादि आचार्यादिवरणांतं कुर्यात् ॥ आचार्य यदत्रे
त्यादि० देवयजनं रक्षस्व ॥ स्थंडिलात् पूर्वतः महीद्यौरित्यादिमंत्रावृत्त्या कलशत्रयं संस्थाप्य॰
पूर्णपात्रनिधानांतं कृत्वा॰ प्रतिमाया अग्न्युत्तारणं कुर्यात् ॥ मध्यकलशे भद्रा अग्ने इति नेऽ५
भैद्री मंत्रस्य वाध्र्यश्वः सुमित्र ऋषिः ॥ अग्निर्देवता ॥ जगती छंदः ॥ भद्रावाहने वि० ॐ भद्रा अग्नेर्व०
तू ॥ भद्रायै॰ भद्रां आ॰ तद्दक्षिणे उत्सूर्य इति मंत्रस्य मैत्रावरुणिर्वसिष्ठ ऋषिः ॥ सूर्यो देवता ॥
त्रिष्टुप्छंदः ॥ सूर्यावा॰ उत्सूर्यो बृ॰ तू ॥ सूर्याय॰ सूर्यं॰ ॥ त्वं सोम इति मंत्रस्य गोतम ऋषिः ॥ तदुत्तर
सोमो देवता ॥ त्रिष्टुप्छंदः ॥ सोमावा॰ त्वं सोम प्रचि॰ तः ॥ सोमाय॰ सोमं॰ ॥ षोडशोपचारैः धृतः
संपूज्य ॥ मध्यमकलशे अन्वारब्ध भद्रा अग्ने इति सूक्तं जपेत् ॥ दक्षिणे संपूर्णे सौरं जपेत् ॥ उ
स्वर्ग५ त्तरे त्वं सोम प्रचिकित इति सूक्तं जपेत् ॥ ततः त्र्यंबकमंत्रं १०८ जपेत् ॥ ततः प्रार्थयेत् ॥ भद्रे भद्र

१ पदं नित्यं कृपया पाहि मां शिशोः ॥ तवार्चने बालकस्य जन्मदोषं व्यपोहतु । रविकन्ये नमस्तुभ्यं
नमस्ते योगियोगिनि ॥ शिशुजन्मोद्भवं दोषं शमयाशु जगन्मये ॥ अज्ञानादथवा ज्ञानाद्यत्कृ
तं पूजनं तव ॥ तेन पुण्यप्रभावेन जन्मदोषं व्यपोहतु ॥ प्रार्थ्य ॥ ततः स्थंडिलसंस्कारपूर्वकं अ
ग्निं संस्थाप्य । ईशान्यां ग्रहान् संस्थाप्य पूजनं च ॥ अन्वादध्यात् ॥ ग्रहान् अधिदेवता प्रत्यधिदे
वतांश्च अमुकसंख्या अमुकद्रव्यैः ॥ भद्रां प्रतिद्रव्यं १०८ भिः चरुतिलाज्यद्रव्यैः सूर्यं सो
मं च प्रत्येकं प्रतिद्रव्यं २८ भिः तैरेव द्रव्यैः । शेषेणेत्यादि आज्यभागांते प्रधानहोमः ॥
स्विष्टकृदादिहोमशेषं समाप्य बलिपूर्णाहुतिं कृत्वा ॥ अभिषेकः ॥ समुद्रज्येष्ठा ० ऋ
क् ४ आपो हिष्ठा ० ऋ ३ त्र्यंबकं ० १ तच्छंयोरावृणीमहे इत्यादि । उत्तरपूजां कृत्वा । आचार्या
दीन् संपूज्य आचार्याय प्रतिमादानं । दक्षिणादानं च । ब्राह्मणभोजनसंकल्प्य भूयसीं च ॥
आज्यावेक्षणं रूपं रूपमिति मंत्रेण । कर्मेश्वरार्पणं कुर्यात् ॥ इति गर्गोक्तभद्राशांति
प्रयोगः ॥ ॥ संवत् १८५२ मिती अधिकभाद्रपद शुद्ध ५ सौम्ये इदं पुस्तकं कुंटे विनायकभट्टस्य ॥ १